# पाणिनि-सारस्वतव्याकरणयोः तुलनात्मकं विश्लेषणम्

## (संज्ञासूत्राणां विशेषसन्दर्भे)

**सुखेन घोषः**
शोधच्छात्रः, संस्कृतविभागः,
महात्मागाँधीकेन्द्रीयविश्वविद्यालयः, बिहारः

**प्रस्तावना-**

महाभाष्ये आचार्यः पतञ्जलिः व्याकरणाध्ययनस्य प्रयोजनान्युल्लेखयता प्रोवाच- **रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति**[1]। एतेन ज्ञायते यत् वैदिकवाङ्मयस्य रक्षणाय, शुद्धोच्चारणाय, विभक्त्यादिविपरिणामज्ञानाय, प्रकृतपाठाय च आदिकालादेव ऋषिभिः व्याकरणशास्त्रमाश्रीयते। भारतीयगुरुशिष्यपरम्परायां व्याकरणाध्ययनाध्यापनस्यैषा सुपरिकल्पितधारा सुदीर्घकालादेव प्रवहमानास्ति। **पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते**[2]- इत्यनेन शास्त्रवाक्येन सिध्यति यत् वेदाध्ययनस्य साधनरूपेण व्याकरणस्य अध्ययनम् अध्यापनञ्च पुराकालादेव प्रचलितमस्ति। सर्वादौ गोपथब्राह्मणे व्याकरणस्य नामोल्लेखः प्राप्यते- **किं वै व्याकरणम्**[3]। ऋक्तन्त्रे व्याकरणशास्त्रस्य आदिप्रवक्तृत्वेन ब्रह्मणः उल्लेखः प्राप्यते- **ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः**[4]। एवमियं शब्दशास्त्रस्य परम्परा अतीव प्राचीना विस्तृता चास्ति। शास्त्रेषु बहूनां वैयाकरणानाम् अपि च तैर्विरचितानां व्याकरणग्रन्थानां नामानि प्राप्यन्ते तद्यथा-

**इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**

**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः**[5]**॥**

एतेषु उपलब्धव्याकरणग्रन्थेषु सर्वाधिकः प्रामाणिको वैज्ञानिकस्तु ग्रन्थो महर्षिपाणिनिना विरचितः **अष्टाध्यायी** इति सर्वेषामभिमतम्। पाणिनिना अष्टाध्यायी-धातुपाठ-उणादिकोष-गणपाठ-शब्दलिङ्गानुशासनम् इति पञ्चोपदेशाः शब्दशास्त्रत्वेन प्रणिताः। एतेषु उपदेशेषु अष्टाध्यायी इति ग्रन्थः **शब्दशास्त्रम्**, **अष्टकम्**, **अष्टाध्यायी**, **शब्दानुशासनम्**, **वृत्तिसूत्रम्** इत्यादिभिः नामभिः अभिधीयते। पाणिन्युत्तरकाले अष्टाध्याय्याः वार्त्तिक-भाष्य-वृत्त्यादयः बहुविधाः ग्रन्थाः रचिताः।

कालपरिवर्तनेन सह भाषायाः परिवर्तनम्, परिवर्धनञ्चापि स्वाभाविकम्। भाषायाः क्रमविकासेऽस्मिन् लोप-आगम-वर्णविकारादीनां परिवर्तनं नूतनसंयोजनञ्चापि अभूत्। अस्मात्

व्याकरणशास्त्रेऽपि बहुविधानि परिवर्तनानि परिवर्धनानि च सञ्जातानि। अनेन पाणिन्युत्तरकाले अनेकानाम् अर्वाचीनव्याकरणानां रचनाः प्रारब्धाः। पण्डितयुधिष्ठिरमीमांसकः 'संस्कृत व्याकरण शास्त्र का इतिहास' इति ग्रन्थे कातन्त्र-चान्द्र-जैनेन्द्र-सरस्वतीकण्ठाभरण-सारस्वत-हेमशब्दानुशासन-मुग्धबोधादीनां महत्त्वपूर्णानां षोडश-अर्वाचीनव्याकरणामुल्लेखं कृतवान्[6]। तस्य मतानुसारं पाणिन्युत्तरवर्तिनां प्रायः सर्वेषाम् अर्वाचीनव्याकरणग्रन्थानां मूलोपजीव्यन्तु पाणिनीयव्याकरणम्। एतेषाम् अर्वाचीनव्याकरणानां विषयन्तु केवलं लोकमुखेप्रयुक्तानां लौकिकसंस्कृतशब्दानाम् अन्वाख्यानमिति।

द्वादशशताब्द्यां भारतवर्षे वैदेशिकानाम् आक्रमणादपि च तेषाम् अनुप्रवेशकारणात् तत्कालीनसामाजे धार्मिकम्, सामाजिकम्, साहित्यिकम्, सांस्कृतिकञ्च नानाविधं परिवर्तनमभूत्। अनेन सह वैदेशिकभाषायाः प्रभावेन संस्कृतभाषायामपि नानाविधं परिवर्तनं सञ्जातम्। अस्यां प्रतिकूलावस्थायां संस्कृतभाषायाः रक्षणाय जटिलतापूर्णशैलीं तथा विद्वतापदर्शनभावशैलीं परित्यज्य सरल-सङ्क्षिप्तशैल्या शास्त्ररचनायाः धाराः विकसिताः। अनया शैल्या अनुभूतिस्वरूपाचार्यः सप्तशतसङ्ख्यकैः सूत्रैः **सारस्वतव्याकरणम्** इति शब्दशास्त्रञ्चकार। किङ्वदन्ति अस्ति यत् वृद्धः दन्तहीनः अनुभूतिस्वरूपाचार्य एकदा कस्यांश्चित् विद्वत्सभायां 'पुंसु' इति शब्दस्य स्थाने 'पुंक्षु' इति अपशब्दस्य उच्चारणात् उपहासस्य पात्रः अभूत्। तदनु देवीसरस्वत्याः अनुग्रहेण सप्तशतसूत्रैः व्याकरणशास्त्रमेतच्चकार, सरस्वत्याः सकाशादागमात् व्याकरणमेतत् सारस्वतव्याकरणम् इत्युच्यते। यद्यपि ग्रन्थकारविषये पण्डितेषु मतभेदाः सन्ति, पण्डितयुधिष्ठिरमीमांसकः क्षेमेन्द्रस्य सारस्वतप्रक्रियायाः टीकायाः उक्तिमुद्धृत्य उक्तवान् यत् नरेन्द्रचार्यः सारस्वतव्याकरस्य रचयिता भवितुं शक्नोति[7]।

## पाणिनीयव्याकरणेन सह सारस्वतव्याकरणस्य संज्ञासूत्राणां तुलनामूलकं विश्लेषणम्-

व्याकरणशास्त्रानुसारं सूत्रं षड्विधम्, यथा-

**संज्ञा च परिभाषा च विधिर्नियम एव च।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।**

षड्विधसूत्रेषु प्रथमं तावत् संज्ञासूत्रम्। सम्-उपसर्गपूर्वकेन ज्ञा-धातुना सह अङ्प्रत्ययेन **संज्ञा** पदञ्जायते। पदस्यास्य अर्थोऽस्ति नाम। यथा देवदत्त इति कस्यापि व्यक्तिविशेषस्य नाम संज्ञा वा। तल्लक्षणमाह- **शक्तिनियामकं संज्ञासंज्ञिसम्बन्धबोधकं वा संज्ञासूत्रम्**। येन सूत्रेण शब्दस्थितशक्तेः संज्ञा-संज्ञिनयोः वा बोधो भवति तत्तु संज्ञासूत्रम्, यथा- 'वृद्धिरादैच् (अष्टा. 1.1.1)'। तस्य प्रयोजनमाह- **लघ्वर्थं हि संज्ञाकरणम्**[8]। व्याकरणे लाघवसिद्धान्तस्य सविशेषमहत्वं वर्तते, लोकश्रुतिरस्ति यत्- **अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः**। अनुभूतिस्वरूपाचार्येणापि महतः शब्दशास्त्रस्य अन्वाख्यानाय शास्त्रोपयोगीनि संज्ञासूत्राणि कृतानि। पाणिनीयव्याकरणमुपजीव्य रचितमेतत् सारस्वतव्याकरणम्। अतः सामान्यत एव

पाणिनीयव्याकरणेन सह व्याकरणस्यास्य सादृश्यं परिलक्ष्यते, यथा- संज्ञाप्रकरणे पठितेषु संयोग-टि-उपधेत्यादिषु संज्ञासूत्रेषु सादृश्यं वर्तते। परन्तु भाषायाः परिवर्तनेन सह व्याकरणस्यापि परिवर्तनं परिवर्धनञ्चाभूत्। अतः पाणिनीयव्याकरणेन सह परवर्तीनि सारस्वतव्याकरणे प्रत्याहार-गुण-वृद्धिसंज्ञादिषु सूत्रेषु बहुविधं वैविद्ध्यमपि परिलक्ष्यते। इतोऽपि सन्ध्यक्षर-नामी-आगम-आदेशेत्यादीनां नूतनसंज्ञासूत्राणां संयोजनमपि दृश्यते।

**पाणिनीय-सारस्वतव्याकरणयोः प्रत्याहारसूत्राणां भिन्नता-**

व्याकरणस्य मूलभित्तिस्वरूपाणि भवन्ति प्रत्याहारसूत्राणि। एतैः सूत्रैः कृत्स्नं व्याकरणशास्त्रं प्रतिष्ठितं भवति। पाणिनिः चतुर्दशप्रत्याहारसूत्राणि आधारीकृत्य कृत्स्नम् **अष्टाध्यायी** इति ग्रन्थञ्चकार। अत्रायं प्रश्नः उदेति यत्- चतुर्दशप्रत्याहारसूत्राणि कुतः आगतानि केन प्रोक्तानि वा? भट्टोजिदीक्षितः सिद्धान्तकौमुद्याः प्रारम्भे प्रत्याहारसूत्राणि उल्लिख्य आह- 'माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि'[9], अर्थात् एतानि माहेश्वरसूत्राणि अणादिसंज्ञानिमित्तानि भवन्ति। सोऽयमक्षरसमाम्नायः श्रुतिवद् गुरुशिष्यपरम्पराक्रमात् महेश्वरादागत इत्याशयः- **महेश्वरादागतानि न तु महेश्वरकृतानि**। नन्दिकेश्वरस्य मतानुसारमेतानि चतुर्दशमाहेश्वरसूत्राणि नटराजस्य ढक्कानादनादागतानि-

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**

**उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्**[10]॥

एतानि माहेश्वरसूत्राणि यथा- **1. अइउण् । 2. ऋलृक् । 3. एओङ् । 4. ऐऔच् । 5. हयवरट् । 6. लण् । 7. ञमङणनम्। 8. झभञ् । 9. घढधष् । 10. जबगडदश् । 11. खफछठथचटतव् । 12. कपय् । 13. शसषर् । 14. हल्** । उक्तैः चतुर्दशमाहेश्वरसूत्रैः यथा वर्णोपदेशा विहिता तथैव चतुश्चत्वारिंश-प्रत्याहाराण्यपि विहितानि सन्ति। यानि आधारीकृत्य महर्षिपाणिनिः समग्रामष्टाध्यायीञ्चकार। अष्टाध्याय्यां सर्वत्रैव प्रत्याहारसूत्राणां प्रयोगः दृश्यते, यथा प्रथमैव सूत्रे **वृद्धिरादैच्** (अष्टा. 1.1.1) इत्यत्र। सूत्रेऽस्मिन् अस्ति पदद्वयं वृद्धिः, आदैच् च। अस्य सूत्रस्य अयमर्थः- आकार ऐच्-प्रत्याहारस्थितौ ऐकार-औकारौ च इत्येतेषां वर्णत्रयानां वृद्धिसंज्ञा भवति। एवमेव कृत्स्नेऽस्मिन् शब्दशास्त्रे प्रत्याहारणां प्रयोगो विधीयते। व्याकरणशास्त्रे प्रत्याहाराणाम् एतेषां लघुपायत्वं महत्त्वञ्च विज्ञाय पाणिनिपरवर्तिभिः विभिन्नैः वैयाकरणैः स्वशास्त्रेषु प्रत्याहारणां प्रयोगो विहितः।

एवमेव ज्ञायते यत् प्रत्याहाराः व्याकरणस्य मूलस्तम्भाः। एतान् लघूपायान् विना महतः शब्दशास्त्रस्योपदेशः असम्भव एव। सारस्वतव्याकरणस्य कर्त्रा अनुभूतिस्वरूपाचार्येण स्वव्याकरणशास्त्रस्य कृते वर्णानामुपदेश महेश्वरान्न प्राप्तः, तेन स्वशब्दशास्त्रे प्रत्याहासूत्रेणैव वर्णोपदेशः कृतः। अष्टाध्याय्यां यथा हल् इत्यनेन प्रत्याहारेण व्यञ्जनवर्णाः अवबुध्यन्ते तथैव सारस्वतव्याकरणेऽपि हस-इत्यनेन व्यञ्जनानां बोधो भवति- **हसा व्यञ्जनानि**

(सारस्वतव्याकरणम् 1.14)। अनेन स्पष्टीर्भवति यत् अनुभूतिस्वरूपाचार्येणापि प्रत्याहाररूपस्य लघूपायस्य ग्रहणं स्वशास्त्रे कृतम्। सारस्वतव्याकरणे प्रत्याहारसूत्राणां सङ्ख्या नवैव, तद्यथा- **1. अइउऋलृ समाना। 2. एऐओऔ सन्ध्यक्षराणि । 3. हयवरल । 4. ञणनङम । 5. झढधघभ । 6. जडगदव । 7. खफछठथ । 8. चटतकप । 9. शषस ।** एतैः प्रत्याहारसूत्रैः निर्मितानां प्रत्याहाराणां प्रयोगः सारस्वतव्याकरणे सर्वत्रैव दरीदृश्यते, यथा 'चपाच्छः शः (सार. 3.4)' इत्यनेन सूत्रेण चप्-प्रत्याहारस्थः अर्थात् च, ट, त, क, प इत्येषां वर्णानां परे श्-कारस्य छ्-कारो विकल्पेन विधीयते, तद्यथा- वाक्+शूरः = 'वाक्छुरः' इति।

**चतुर्दशमाहेश्वरसूत्राणि अनुभूतिस्वरूपाचार्यकृत-नवप्रत्याहारसूत्राणि च-**

| माहेश्वरसूत्राणि | अनुभूतिस्वरूपाचार्यकृत-प्रत्याहारसूत्राणि |
|---|---|
| 1. अइउण्। 2. ऋलृक्। 3. एओङ्। ४4. ऐऔच्। 5. हयवरट्। 6. लण्। 7. ञमङणनम्। 8. झभञ्। 9. घढधष्। 10. जबगडदश्। 11. खफछठथचटतव्। 12. कपय्। 13. शसषर्। 14. हल्। | 1. अइउऋलृ समाना। 2. एऐओऔ सन्ध्यक्षराणि। 3. हयवरल। 4. ञणनङम। 5. झढधघभ। 6. जडगदव। 7. खफछठथ। 8. चटतकप। 9. शषस। |

**सारस्वतव्याकरणे प्रतिपादितानां प्रत्याहारसूत्राणां वैशिष्ट्यम्-**

प्रत्याहारसूत्राणां मुख्यं प्रयोजनन्तु लघुकरणम्, अनेन सुविशालशब्दशास्त्रस्य उपदेशः क्रियते- प्रत्याह्यन्ते सङ्क्षिप्यन्ते वर्णाः अनेन इति प्रत्याहारः। सारस्वतव्याकरणे केवलं नवैव प्रत्याहारसूत्राणि सन्ति, परन्तु पाणिनीयाष्टाधाय्यां सन्ति चतुर्दशप्रत्याहारसूत्राणि। अनेन प्रतीयते यत् अनुभूतिस्वरूपाचार्यः प्रत्याहारसूत्राणां सङ्क्षिप्तिकरणं कृतवान्। अत एव अष्टाध्याय्यां यत्र चतुश्चत्वरिंशप्रत्याहाराणां प्रयोगः प्राप्यते तत्रैव सारस्वतव्याकरणे प्रत्याहाराणां विंशतिः प्रयोगः समुपलभ्यते, तद्यथा-

| अष्टाध्याय्यां प्रयुक्ताः प्रत्याहाराः | सारस्वतव्याकरणे प्रयुक्ताः प्रत्याहाराः[11] |
|---|---|
| अण्, अक्, अच्, अट्, अण्, अम्, अल्, अश्, इक्, इच्, इण्, उक्, एङ्, एच्, ऐच्, खय्, खर्, ङम्, चय्, चर्, छव्, जश्, झय्, झर्, झर्, झल्, झश, झष्, बश्, भष्, मय्, यञ्, यण्, यम्, यय्, यर्, रल्, वल्, वश्, शर्, शल्, हल्, हश्, र | हस, झभ, जब, यप, अब, इल, चप, ञम, झभ, खस, झस, छत, यम, हव, खप, डब, ढभ, रस, वस, शस, झप, अब, ओ, भव |

पाणिनीयप्रत्याहारसूत्रे ह्-कारस्य वारद्वयम् उपदेशः प्राप्यते। यतोहि अट्, अश्, हश् इत्यादिषु प्रत्याहारेषु ह्-कारस्य पाठहेतोः वर्णसमाम्नाये ह्-कारस्य द्वित्वप्रयोगः दृश्यते। परन्तु

सारस्वतव्याकरणे केवलम् एकवारं ह्-कारस्य व्यवहारः दृश्यते। तेन एकादशतमं माहेश्वरसूत्रं सङ्क्षिप्य 'खफछठथ', 'चटतकप' इति सूत्रद्वयेन विभाजितम्। अनेन कपय्-इत्यस्यापि ग्रहणो भवति। इतोऽपि तेन 'अइउण्', 'ऋलृक्', 'एओङ्', 'ऐऔच्' इत्यादिनि सूत्राणि सङ्क्षिप्य 'अइउऋलृ समाना', 'एऐओऔ सन्ध्यक्षराणि' इति संज्ञासूत्रद्वयेन उपदेशः कृतः। पाणिनीये अण्प्रत्याहारविषये संशयः जायते यत् अणादि प्रत्याहारनिर्माणे कस्य ण्-कारस्य ग्रहणं भवति। एतादृशः संशयः अनुभूतिस्वरूपाचार्यकृतेषु प्रत्याहारसूत्रेषु न दृश्यते। सामान्यदृष्ट्या विषयेऽस्मिन् सारस्वतव्याकरणस्य सारल्यं परिलक्ष्यते।

**स्वरसंज्ञा-**

सारस्वतकारः अनुभूतिस्वरूपाचार्यः 'अइउऋलृ समानाः (सार. 1.1)' इत्यनेन समानसंज्ञायाः, 'एऐओऔ सन्ध्यक्षराणि (सार. 1.3)' इत्यनेन सन्ध्यक्षरसंज्ञायाश्च निरूपनादनन्तरम् उभययोः समान-सन्ध्यक्षरयोः 'उभये स्वरा (सार. 1.4)' इत्यनेन सूत्रेण स्वरसंज्ञां विहितवान्। यस्यार्थो भवति समानाक्षराः सन्ध्यक्षराश्च (ए, इ, उ, ऋ, लृ, ए, ऐ, ओ, औ) स्वरसंज्ञका इति।

अष्टाध्याय्यां समानाक्षरसंज्ञायाः, सन्ध्यक्षरसंज्ञायाः, स्वरसंज्ञायाश्च अभावः परिलक्ष्यते। वक्तुं शक्यते यत् अतिप्रसिद्धत्वात् पाणिनिः एतेषाम् अन्वाख्यानं न कृतवान्। अष्टाध्याय्याम् अच्-इत्यनेन प्रत्याहारेण स्वराणां बोधो भवति। स्वरवर्णानां लोकप्रसिद्धत्वात् पाणिनिना गौरवदोषनिवारणाय स्वरादीनामुपदेशमात्रः कृतः। अष्टाध्याय्याम् 'उच्चैरुदात्तः (अष्टा. 1.2.29)', 'नीचैरनुदात्तः (अष्टा. 1.2.30)', 'समाहारः स्वरितः (अष्टा. 1.2.31)' एतैः सूत्रैः उदात्त-अनुदात्त-स्वरितसंज्ञाः विधीयन्ते। परन्तु सारस्वतव्याकरणे उदात्तादिस्वरसंज्ञायाः अभावः दृश्यते। यतोहि सारस्वतव्याकरणे केवलं लौकिकशब्दानाम् उपदेशः क्रियते अतः अत्र स्वरप्रक्रियायाः वर्णनं नास्ति।

ऋक्-प्रातिशाख्येऽपि समानाक्षर[12]-सन्ध्यक्षरविधानात्[13] परं उभयोः 'एते स्वराः[14]' इति सूत्रेण स्वरसंज्ञा विहिता। न केवलम् ऋक्प्रातिशाख्ये तैत्तिरीयप्रातिशाख्ये[15] याज्ञवल्क्यशिक्षायाञ्च[16] स्वरशब्दस्य प्रयोगो विशेषेण द्रष्टव्यः। अतो वक्तुं शक्यते यत् शिक्षा-प्रातिशाख्यादिग्रन्थानां प्रभावो व्याकरणेऽस्मिन् दरीदृश्यते। एतैः प्रभावितस्सन्ननुभूतिस्वरूपाचार्यः स्वशास्त्रे वर्णोपदेशेन सह समानाक्षर-सन्ध्यक्षर-स्वरादीनाम् अन्वाख्यानं कृतवान्।

**नामिसंज्ञा-**

अनुभूतिस्वरूपाचार्येण 'अवर्ज्जा नामिनः (सार. 1.5)' इत्यनेन सूत्रेण अवर्णरहितानां स्वराणां नामिसंज्ञा कृता। अर्थात् इ, ई, उ, ऊ, ऋ, ॠ, लृ, ॡ, ए, ऐ, ओ, औ इत्येताः नामिसंज्ञकाः। नामिसंज्ञायाः परं 'नामिनो रः (सार. 5.11)' इति विधिसूत्रेण 'अग्निरत्र' (अग्नि$अत्र), 'वहिर्यजते' (वहिः$यजते) इत्यादिनि पदानि सिद्ध्यन्ति। अपरपक्षे अष्टाध्याय्यां

नामिसंज्ञायाः अभावः दृश्यते। नामिसंज्ञायाः प्रयोग ऋग्वेदप्रातिशाख्येऽपि वर्तते, यथा- 'ऋकारादयो दश नामिनः स्वराः[17]' इति।

**व्यञ्जनसंज्ञा-**

सारस्वतव्याकरणे 'हसा व्यञ्जनानि (सार. 1.14)' इत्यनेन सूत्रेण हस्प्रत्याहारस्थितानां वर्णसमूहानां व्यञ्जनसंज्ञकाः भवन्ति। अर्थात् हयवरल-इत्यतः शषसपर्यन्ताः वर्णसमूहाः व्यञ्जनसंज्ञकाः भवन्ति। हस्प्रत्याहारस्थिता वर्णाः यथा- ह य व र ल ञ ण न ङ म झ ढ घ भ ज ड द ग ब थ फ छ ठ थ च ट त क प श ष स इति। ग्रन्थकारेण केवलं व्यञ्जनानाम् उपदेशमात्रः कृतः, लोकप्रसिद्धत्वात् तस्य विशेषलक्षणन्तु न विहितम्।

किन्तु पाणिनिना स्वर-व्यञ्जनयोः उभयोः पृथकतः लक्षणं न विहितम्। अष्टाध्याय्यां हल्प्रत्याहारेणैव व्यञ्जनवर्णानां बोधो भवति। एवं ज्ञायते व्यञ्जनादीनाम् अतिप्रसिद्धिकारणात् शास्त्रलाघवकारणात् वा पाणिनिः तेषां पुनर्व्याख्यानं न कृतवान्।

**प्रत्याहारसंज्ञा-**

पाणिनिना 'आदिरन्त्येण सहेता (अष्टा. 1.1.71)' इति सूत्रेण प्रत्याहारसंज्ञा विहिता। अस्य सूत्रस्य अयमर्थः- अन्त्येनेता इत्संज्ञकवर्णैः सह आदिर्मध्यवर्तिवर्णानां स्वस्य च प्रत्याहारसंज्ञा भवति, तद्यथा- अण्, अच्, हल्, अल् इत्यादयः।

सारस्वतकारः 'आद्यन्ताभ्याम् (सार. 1.13)' इति सूत्रेण प्रत्याहारसंज्ञां कृतवान्। अस्य सूत्रस्य अर्थः- आद्यन्तवर्णाभ्यां सह मध्यवर्तिवर्णानां प्रत्याहारसंज्ञा भवति, यथा- अव्, जव्, चप् इत्यादयः।

उभावपि शास्त्रकारौ प्रत्याहारेण शास्त्रस्य सङ्क्षिप्तिकरणाय प्रवृत्तौ आस्ताम्। प्रत्याहारसंज्ञाविधाने पाणिनि-अनुभूतिस्वरूपाचार्ययोः मध्ये यथा सादृश्यं परिलक्ष्यते, तथैव पाणिनिकृतेन प्रत्याहारसूत्रेण सह अनुभूतिस्वरूपाचार्यकृतप्रत्याहारसूत्रस्य एकं वैसादृश्यमपि दृश्यते। तद्यथा सारस्वतकारः अनुबन्धान् नाङ्गीकृतवान्; किन्तु पाणिनिना अनुबन्धाः स्वीकृताः। अतः पाणिनीयव्याकरणे प्रत्याहारस्थितानाम् आदि तथा मध्यवर्तिवर्णानां ग्रहणं भवति, न तु अन्त्य इत्संज्ञकवर्णानाम्। यथा- 'इको यणचि (अष्टा. 6.1.77)' सूत्रस्थितानाम् इक्प्रत्याहारस्थिनाम् इ उ ऋ लृ एतेषाम् अपि च यण्प्रत्याहारस्थितानां य् व् र् ल् इत्येतेषां ग्रहणं भवति, अन्त्य क्-कारस्य, ण्-कारस्य च ग्रहणं न भवति। पक्षान्तरे सारस्वतव्याकरणे अनुबन्धप्रक्रियायाः प्रयोगो नास्ति। अतः प्रत्याहारस्थितानां सर्वेषां वर्णानां ग्रहणं भवति। यथा- 'झवे जवाः (सार. 2.3)' इति सूत्रे झव्प्रत्याहारस्थितानां झ ढ ध घ भ इत्येतेषां सर्वेषां ग्रहणो भवति।

**इत्संज्ञा-**

इत्संज्ञा व्याकरणशास्त्रस्य एका महत्त्वपूर्णा संज्ञास्ति। इत्संज्ञया अतिरिक्तवर्णानाम् अदर्शनं भवति। पाणिनीयव्याकरणे अनुबन्धप्रयोगः अस्ति अत इत्संज्ञायाः विधानमपि सविशेषं महत्त्वपूर्णमस्ति। इत्संज्ञाविधायकं प्रथमं सूत्रन्तु- 'उपदेशेऽजनुनासिक इत्' इति। सूत्रार्थो भवति- औपदेशिकावस्थायाम्[18] अनुनासिकः अच् इत्संज्ञको भवति। जिज्ञासा भवति उपदेशः कः? वरदाराजेन उक्तम्- 'उपदेश आद्योच्चारणम्'[19]। आद्योच्चारणं नाम आद्यानां पाणिनि-कात्यायन-पतञ्जलीनाम् उच्चारणं प्रथमोच्चारणम् अज्ञातस्वरूपज्ञापकोच्चारणं वा। यथा- 'गम्लृ' इत्येक औपदेशिकः धातुः; औपदेशिकधातोः लोकव्यवहाराय अनुनासिकस्वरस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञा तदनु 'तस्य लोपः', 'अदर्शनं लोपः' इति सूत्राभ्यां तस्य लोपविधानानन्तरं 'गम्' इति लौकिकधातुः निष्पन्नो भवति। अष्टाध्याय्याम् इत्संज्ञाविधायकानि षट्सूत्राणि सन्ति, तद्यथा- 'उपदेशेऽजनुनासिक इत् (अष्टा.1.3.2)', 'हलन्त्यम् (अष्टा. 1.3.3)', 'आदिर्ञिटुडवः (अष्टा. 1.3.5)', 'षः प्रत्ययस्य (अष्टा. 1.3.6)', 'चुटू (अष्टा. 1.3.7)', 'लशक्वतद्धिते (अष्टा. 1.3.8)' चेति। 'उपदेशेऽजनुनासिक इत्' इति सूत्रतः उपदेशः अपि च इत् इति पदद्वयं परवर्तिषु 'हलन्त्यम्' इत्यादिषु सूत्रेषु अनुवर्त्यते।

अनुभूतिस्वरूपाचार्यकृते सारस्वतव्याकरणेऽपि इत्संज्ञाप्रक्रिया दृश्यते। अत्र इत्संज्ञाविधायकं सूत्रन्तु 'कार्य्ययेत् (सार. 1.15)'। अर्थात्- प्रत्ययादेः अतिरिक्तं परन्तु केवलम् उच्चारणार्थे प्रयुक्ताः वर्णा इत्संज्ञकाः। टीकाकारचन्द्रकीर्तिना उक्तं यत्- 'प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्य्यायोच्चार्य्यमानो वर्ण इत्संज्ञको भवति'[20]। यथा- सुबन्तप्रकरणे प्रथमायाः विभक्त्याः बहुवचने जस्-प्रत्ययादेशो भवति; तदनु 'कार्य्ययेत्' इतीत्संज्ञाविधायकेन सूत्रेण ज्-कारस्य इत्संज्ञा अपि च 'यस्येत्संज्ञा तस्य लोपः (सार. 1.16)', 'वर्णादर्शनं लोपः (सार. 1.17)' इत्येताभ्यां सूत्रभ्यां ज्-कारस्य लोपः अदर्शनञ्च भूत्वा केवलम् 'अस्' अवशिष्यते।

**आगम-आदेशसंज्ञा-**

सारस्वतकारः 'मित्रवदागमः (सार. 1.19)' सूत्रेण आगमसंज्ञां कृतवान्। सूत्रस्यास्य अयमर्थः- मित्रं यथा मित्रस्य अनिष्टं न साधयति तथैव आगमोऽपि स्थानेः (प्रकृतेः प्रत्ययस्य च) अनिष्टम् असम्पाद्य यथास्थानं मित्रवद् उपवसति। सारस्वतव्याकरणे व्यञ्जनसन्धिप्रकरणे आगमविधायकमेकं सूत्रं यथा 'नः सक् छते'; येन छत्परे नकारस्य सकारागमो भवति। यथा- राजन्+चित्रम् इत्यत्र छत्प्रत्याहारे परे नकारस्य सकारागमो भवति। तदनु 'नश्चापदान्ते झसे (सार. 4.24)' अपि च 'स्तोः श्चुभिः श्चु (सार. 4.6)' इत्यादिभिः सूत्रैः प्रक्रियान्ते 'राजंश्चित्रम्' इति पदसिद्धिर्भवति।

सारस्वतकारकृतम् आदेशसंज्ञाविधायकं सूत्रमस्ति- 'शत्रुवदादेशः (सार. 1.20)'। अर्थात् शत्रुः यथा शत्रोः विनाशं साधयति तथैव आदेशोऽपि स्थानीम् अप्सार्य तस्मिन्नेव स्थाने

वसति। विसर्गसन्धिप्रकरणे पठितं 'विसर्जनीयस्य सः (सार. 5.1)' इत्येकम् आदेशविधायकं सूत्रम्। अनेन कः$तनोति अस्यामवस्थायां खस्परे विसर्गस्य सकारादेशेन 'कस्तनोति' इति पदं निष्पद्यते। समग्रे सारस्वतव्याकरणे एतादृशानि आदेश-आगमविधायकानि सूत्राणि दरीदृश्यन्ते।

पक्षान्तरे अष्टाध्याय्याम् आगम-आदेशसंज्ञाविधायकं सूत्र नास्ति। पाणिनिना तस्य ग्रन्थे आदेश-आगमौ संज्ञासूत्ररूपेण न गृहीतौ। परन्तु उभयोः प्रयोगः अष्टाध्याय्यां दरीदृश्यते। यथा सन्धिप्रकरणे आदेशविधायकमेकं सूत्रम् 'इको यणचि'( संहितायाम् इकः स्थाने यण् स्यात् अचि परतः)। अतः सुधी+उपास्य अस्यामवस्थायाम् ई स्थाने य्-कारदेशेन प्रक्रियान्ते 'सुध्युपास्यः' इति पदसिद्धिर्भवति। पाणिनिकृतमेकम् आगमविधायकं सूत्रं 'ह्रस्वनद्यापो नुट् (अष्टा. 7.1.54)'; ह्रस्वान्त-नद्यन्त-आबन्ताङ्गस्य परवर्तिनः आम्-विभक्तेः नुडागमो भवति। यथा- राम+आम् > राम नुट्+आम् अस्यामवस्थायां प्रक्रियान्ते 'रामाणाम्' इति पदस्य सिद्धिर्भवति।

**संयोगसज्ञा-**

पाणिनिविहितम् संयोगसंज्ञाविधायकं सूत्रं 'हलोऽनन्तराः संयोगः (अष्टा. 1.1.7)' इति। सूत्रस्यास्य अयमर्थः- अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युः। संयोगोऽयं द्वयोः ततोऽधिकानां वर्णानां वा भवितुमर्हति। विहितायां संयोगसंज्ञायां 'स्कोः संयोगाद्योरन्ते च (अष्टा. 8.2.29)', 'संयोगान्तस्य लोपः (अष्टा. 8.2.23)' इत्यादिभिः सूत्रैः अभिष्टसिद्धयः प्रयोगाः साध्यन्ते।

'स्वरान्तरिता हसाः संयोगः (सार. 1.21)' इति सारस्वतकारकृतं संयोगसंज्ञासूत्रम्। स्वरवर्णैः अव्यवहितानां हसादिव्यञ्जनानां मेलनैः संयोगसंज्ञा भवति। सारस्वतकारकृते संयोगसंज्ञाविधायके सूत्रेऽस्मिन् सारल्यं प्रतीयते। यतोहि पाणिनीये 'हलोऽनन्तराः संयोगः' इति सूत्रे अच्-इति पदं अनुवृत्तिना आगच्छति तदनु सम्पूर्णसूत्रस्य अर्थबोधो भवति। परन्तु सारस्वतव्याकरणे 'स्वरान्तरिता हसाः संयोगः' इति सूत्रमध्ये स्वर इति पदस्योल्लेखोऽस्ति, अतः प्रकृतसूत्रेणैव सूत्रार्थबोधो भवति।

**वर्गसंज्ञा-**

सारस्वतव्याकरणे 'कुचुटुतुपु वर्गाः (सार. 1.22)' इति वर्गसंज्ञाविधायकमेकं सूत्रम्। अर्थात् कु चु टु तु पु एते वर्गसंज्ञकाः भवन्ति। प्रश्नः उदेति यत् एकस्मिन् वर्गे कति वर्णाः सन्ति? स्वरेषु उकारः पञ्चमस्वरः, अतः कु इत्यादिषु उकारस्य ग्रहणेन प्रत्येकवर्गेषु पञ्चवर्णानां ग्रहणं भवतीति। तद्यथा- कु- क् ख् ग् घ् ङ्; चु- च् छ् ज् झ् ञ्; टु- ट् ठ् ड् ढ् ण्; तु- त् थ् द् ध् न्; पु- प् फ् ब् भ् म् । ऋग्वेदप्रातिशाख्येऽपि स्पर्शसंज्ञाविधानात् परं पञ्चविंशतिस्पर्शवर्णाः पञ्च-पञ्चवर्गेषु विभक्तास्सन्ति, यथा- 'पञ्च ते पञ्चवर्गाः'[21]। वर्गसंज्ञया 'स्तोः श्चुभिः श्चुः (सार. 4.6)', 'ष्टुभिः ष्टुः (सार. 4.8)' इत्यादिसूत्रेषु तु, चु, टु इत्यादिवर्गानां बोधो भवति।

अपरतः पाणिनिः अष्टाध्याय्यां वर्गसंज्ञायाः अतिप्रसिद्धित्वात्तस्याः अन्वाख्यानतो विरतः आसीत्। तेन शास्त्रे कु-इत्यादीनां पञ्चवर्गाणां प्रयोगः कृतः; परन्तु संज्ञासूत्ररूपेण तेषां पृथगालोचना न विहाता। यथा- 'अनुदित्सवर्णस्य चाप्रत्ययः (अष्टा. 1.1.69)' इति सूत्रे उदित् शब्देन कु चु टु तु पु एते बुध्यन्ते। लघुसिद्धान्तकारेण उक्तम्- 'कुचुटुतुपु एते उदितः'। इतोऽपि 'स्तोः श्चुना श्चुः (अष्टा. 8.4.40)', 'ष्टुना ष्टुः (अष्टा. 8.4.41)' इत्यादिषु सूत्रेषु वर्गेणैव लोकप्रसिद्धवर्गव्यवहारेण एव वर्णव्यवहारः दृश्यते।

प्रश्नः उदेति यत् एताः स्वर-व्यञ्जन-वर्गादिसंज्ञाः लोकप्रसिद्धाः सहजबोध्याश्च सन्ति पुनश्च सारस्वतकारः किमर्थं एताषां संज्ञानां विधाने प्रवृत्तोऽभूत्? अत्रेदं वक्तुं शक्यते यत् तात्कालीनां अवस्थाम् अवलोक्य भाषायां नानाविधपरिवर्तनैः संस्कृतभाषां संरक्षणाय च अनुभूतिस्वरूपचार्यः एताषां प्रसिद्धानामपि संज्ञानाम् अन्वाख्यानं कृतवान्। तत्कालीने समये भाषाया नानाविधपरिवर्तनेन अपि च भाषायाः विलुप्तेः करालग्रासतः संस्कृतभाषायाः रक्षणार्थम् अनुभूतिस्वरूपाचार्यः शास्त्रेऽस्मिन् वर्गादीनामन्वाख्यानं कृतवानिति।

**गुणसंज्ञा-**

गुण इति व्याकरणस्य एका महत्त्वपूर्णा संज्ञा। पाणिनिकृतं गुणसंज्ञकं सूत्रम् 'अदेङ्गुणः (अष्टा. 1.1.2)', यस्यार्थः अ, ए, ओ एते गुणसंज्ञकाः। 'तपरस्तत्कालस्य (अष्टा. 1.1.70)' सूत्रेण तपरकरणात् अनन्तरं तपरः अत् समकाले उच्चारितानां ह्रस्वभेदसमूहानां बोधको भवति, तथैव एङ् केवलं तत्कालविशिष्टानां दीर्घभेदसमूहानां बोधको भवति। अर्थात् ह्रस्व-अकारस्य, दीर्घ-एकारस्य, दीर्घ-ओकारस्य च गुणसंज्ञा भवति। तदनु 'आद्गुणः (अष्टा. 6.1.87)' इति विधिसूत्रेण उप+इन्द्रः = 'उपेन्द्रः', गङ्गा+उदकम् = 'गङ्गोदकम्' इत्यादिनि पदानि निष्पद्यन्ते।

सारस्वतकारकृतं गुणसंज्ञाविधायकं सूत्रमस्ति 'अरेदोन्नामिनो गुणाः (सार. 1.23)'। अस्यार्थः- नामिस्थानिकाः अर्, ए, ओ एते त्रयो वर्णाः गुणसंज्ञकाः भवन्ति। यथा- तव+इदम् अस्यामवस्थायाम् 'अ इ ए (सार. 2.11)' इत्यनेन सूत्रेण अ+इकारयोः स्थाने ए-कारैकादेशेन 'तवेदम्' पदस्य सिद्धिर्भवति।

सारस्वतकारो नामिसंज्ञया अकारस्य गुणसंज्ञाविधानतो विरतः आसीत्। तेन अर्-इत्यस्य गुणसंज्ञा कृता। अपरतः पाणिनीयव्याकरणे 'उरण् रपरः (अष्टा. 1.1.51)' सूत्रेण रपरकरणस्य प्रयोजनं दृश्यते। यथा- कृष्ण+ऋद्धि इति स्थाने 'आद्गुणः' सूत्रेण अकारः अपि च 'उरण् रपरः' सूत्रेण रपरकरणं कृत्वा अर्-आदेशेन 'कृष्णर्द्धिः' सिध्यति। परन्तु सारस्वतव्याकरणे अस्याः क्लिष्टतायाः निवारणार्थम् 'अर्' इतस्य गुणसंज्ञा विहिता। फलस्वरूपं तव+ऋद्धिः अस्यामवस्थायाम् 'ऋ अर् (सार. 2.26)' सूत्रेण अर्-आदेशेन 'तवर्द्धिः' सिध्यति।

**वृद्धिसंज्ञा-**

पाणिनिकृतं वृद्धिसंज्ञकं सूत्रं 'वृद्धिरादैच् (अष्टा. 1.1.1)' इति वर्तते। अनेन सूत्रेण आ ऐ औ एते वर्णाः वृद्धिसंज्ञकाः भवन्ति। पाणिनीयव्याकरणे वृद्धि इत्यनेन आ-कारस्य, ऐ-कारस्य, औ-कारस्य च बोधो भवति। अनन्तरं 'वृद्धिरेचि (अष्टा. 6.1.88)' सूत्रेण- 'कृष्णैकत्वम्', 'गङ्गौघम्' इत्यादीनां पदानां सिद्धिर्भवति।

सारस्वतकारकृतं वृद्धिसंज्ञकं सूत्रं 'आरै औ वृद्धिः (सार. 1.24)' इति। अर्थात् आ, ऐ, औ, आर् इत्येतेषां वृद्धिसंज्ञा भवति। यथा तव+एषा अत्र 'एऐऐ (सार. 2.12)' इत्यनेन सूत्रेण अकारपरस्थितस्य एकारस्य वृद्धिः ऐकारः भूत्वा 'तवैषा' भवति। तव+ओदनम् अस्यामवस्थायाम् 'ओऔऔ (सार. 2.14)' सूत्रेण 'तवौदनम्' सिध्यति।

'वृद्धिरादैच्' अष्टाध्यायाः प्रथमं सूत्रम्। अत्र द्रष्टव्यं यत् 'अदेङ्गुणः' इति सूत्रे उद्देश्यभूतः अदेङ् इति पदं पूर्वे अथ च विधेयपदञ्च गुणः परे अस्ति। अतः अत्रापि 'आदैच् वृद्धि' इति सूत्रं भवेत्। परन्तु कथं महर्षिणा वृद्धि इति पदम् आदौ प्रयुक्तम्? तस्योत्तरे महाभाष्यकारेण उक्तं यत्- ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं भगवता मङ्गलवाचको वृद्धि इति शब्दः अदितः प्रयुक्तः[22]। किन्तु सारस्वतकारः वर्णक्रमानुसारं सर्वादौ गुणसंज्ञां तदनु वृद्धिसंज्ञाञ्च कृतवान्।

**टिसंज्ञा-**

पाणिनीयव्याकरणे टि-संज्ञा अपि एका महत्त्वपूर्णा संज्ञा। 'अचोऽन्त्यादि टि (अष्टा. 1.1.64)' इति टि-संज्ञाविधायकं सूत्रं विद्यते। अस्यार्थः अचां मध्ये यः अन्त्यः स आदिर्यस्य तत् परवर्तिनां वर्णसमुदायानां टि-संज्ञा भवति। यथा 'मनस्' इत्यत्र अस् इति वर्णसमुदायस्य टि-संज्ञा भवति। इतोऽपि यत्र अन्त्यस्य अकारस्य परे यदि कोऽपि वर्णो नास्ति, तत्र केवलम् अकारस्य टि-संज्ञा भवति, यथा 'शर्क', 'कुल' इत्यादयः।

सारस्वतकारकृतं टि-संज्ञाविधायकं सूत्रम् 'अन्त्यस्वरादिष्टः (सार. 1.25)' इति। अन्त्यः यः स्वः तदादिवर्णः टिसंज्ञको भवति। यथा 'उमा' इति पदस्य अन्त्यः अ-कारः टि-संज्ञकः; 'राजन्' इति पदस्य अन् टि-संज्ञकः। टि-संज्ञाविधाने पाणिनिना सह अनुभूतिस्वरूपाचार्यस्य सादृश्यं लक्ष्यते। पदगतपार्थक्ये सत्यपि तयोः प्रतिपादिते अर्थे समानता परिलक्ष्यते।

**उपधासंज्ञा-**

पाणिनिकृतम् उपधासंज्ञकं सूत्रम् 'अलोऽन्त्यात्पूर्व उपधा (अष्टा. 1.1.65)' इति। अनेन सूत्रेण पदान्तस्य पूर्ववर्तिनो वर्णस्य उपधासंज्ञा भवति।

शास्त्रव्यवहारार्थं सारस्वतकारेणापि उपधासंज्ञा कृता 'अन्त्यात्पूर्व्व उपधा (सार. 1.26)' इत्यनेन सूत्रेण। अन्त्याद्वर्णमात्रात्पूर्वो यो वर्णः स उपधासंज्ञको भवति। यथा- 'राजन्' इत्यस्य नकारपूर्ववर्ती अकारः उपधासंज्ञकः; भिद् धातोः इ-कारः उपधासंज्ञकः। अत्रापि उपधासंज्ञायाः

विषये उभयोः शास्त्रकारयोः सादृश्यं दृश्यते। उभावपि अन्त्यवर्णात् पूर्ववर्तीवर्णस्य उपधासंज्ञां चक्रतुः।

**लघु-गुरुसंज्ञा-**

पाणिनिना 'ह्रस्वं लघु (अष्टा. 1.4.10)' इति सूत्रेण लघुसंज्ञा कृता तदनु 'संयोगे गुरु (अष्टा. 1.4.11)', 'दीर्घं च (अष्टा. 1.4.12)' इत्युभाभ्यां सूत्राभ्यां गुरुसंज्ञा विहिता। ह्रस्वस्वराः लघुसंज्ञकाः भवन्ति; संयोगवर्णे परे ह्रस्वस्वराः गुरुसंज्ञकाः अपि च दीर्घस्वराः गुरुसंज्ञकाः भवन्ति। लघुसंज्ञया 'पुगन्तलघुपधस्य च (अष्टा. 7.3.86)' इत्यादीनां सूत्राणाम् अपि च गुरुसंज्ञया 'गुरोश्च हलः (अष्टा. 3.3.103)', 'इजादेश्च गुरुमतोऽनृच्छ (अष्टा. 3.1.35)' इत्यादीनाम् अभिष्टार्थानां सिद्धिर्भवति।

सारस्वतकारः 'असंयोगादिपरो ह्रस्वो लघुः (सार. 1.27)' इत्यनेन लघुसंज्ञा अपि च 'विसर्गानुस्वारसंयोगपरो दीर्घश्च गुरुः (सार. 1.28)' इत्यनेन गुरुसंज्ञां कृतवान्। संयोगादिवर्णरहितानाम् अ इ उ ऋ लृ इत्येतेषां ह्रस्वस्वराणां लघुसंज्ञा; अपरतो विसर्गानुस्वारसंयोगवर्णे परे ह्रस्वस्वराणां दीर्घस्वराणाञ्च गुरुसंज्ञा भवति; यथा 'कः', 'अस्य' एतयोः पदयोः यथाक्रमं विसर्गपरे अ-कारस्य तथा च संयोगवर्णपरे अ-कारस्य गुरुसंज्ञा भवति।

**अनुनासिकसंज्ञा-**

अष्टाध्याय्यां 'मुखनासिकावचनोऽनुनासिकः (अष्टा. 1.1.8)' सूत्रेण अनुनासिकसंज्ञा विहिता। मुखनासिकाभ्यां सह उच्चार्यमानाः वर्णाः अनुनासिकसंज्ञकाः स्युः। अनुभूतिस्वरूपाचार्येणापि 'मुखनासिकावचनोऽनुनासिकः (सार. 1.29)' सूत्रेण अनुनासिकसंज्ञा विहिता। सूत्रार्थो यथा मुखनासिकाभ्याम् उच्चारिताः वर्णाः अनुनासिकसंज्ञकाः भवन्ति। यथा- ङ्, ञ्, ण्, न्, म् इत्येते वर्णाः अनुनासिकसंज्ञकाः। पाणिनि-सारस्वतयोः उभयोरपि शास्त्रयोः अनुनासिकसंज्ञकसूत्रम् अभिन्नार्थस्य द्योतकम्।

**उपसंहारः-**

संस्कृतभाषायाः सर्वेषु आर्षव्याकरणेषु केवलं पाणिनीयव्याकरणम् अद्यापि साङ्गोपाङ्गम् अस्माकं समक्षे स्वमहिम्ना उपस्थितोऽस्ति। पाणिनीयव्याकरणं प्राचीनार्षवाङ्मयस्य एकम् अनुपमनिधिस्वरूपं विद्यते। अस्य आलोके सुरभारत्याः देववाण्याः सर्वे प्राचीनाः अर्वाचीनाश्च वाङ्मयाः प्रकाशिताः भवन्ति। ग्रन्थोऽयं भारतीयमनीषाणां सूक्ष्मचिन्तनस्य, अपरिसीमज्ञानस्य, अद्भुतप्रतिभायाः, निपुणदक्षतायाश्च परिचायकः। अनेन सुरभारती महती गौरवान्विता विद्यते। पाणिनिव्याकरणवत् अखिलेऽपि संसारे तावत् परिष्कृतम्, सुपरिकल्पितम्, वैज्ञानिकं व्याकरणं द्वितीयं नास्ति।

संज्ञासूत्राणां उपर्युक्तानेन विश्लेषणेन प्रतीयते यत् सारस्वतव्याकरणस्य उपरि पाणिनीयव्याकरणस्य प्रभावः सुस्पष्ट एव। किन्तु बहुत्र सारस्वतव्याकरणस्य विशिष्टाः सिद्धन्ताः अपि वैयाकरणानां चेतांसि आह्लादयन्ति। सारस्वतव्याकरणे पाणिनीय-प्रत्याहारपद्धतेः समावेशे कृते सत्यपि विभ्रान्त्युपादनकारिणां स्थलानां सम्यक् परिहारः क्रियते। सारस्वतव्याकरणे समान-स्वर-नामिसंज्ञादिप्रकरणे प्रातिशाख्यानामपि प्रभावो विशेषतया परिलक्ष्यते। उपर्युक्तविश्लेषणेन अनुभूतिस्वरूपाचार्यविरचितस्य सारस्वतव्याकरणस्य महत्त्वं स्पष्टीभवति। अनुभूतिस्वरूपाचार्यः प्रतिभासम्पन्नः, अद्भुतमनस्वी तथा वैयाकरणसमाजस्य साधकशिरोमणिः आसीत्। दुरूहव्याकरणशास्त्रे प्रवेशाय सरलतायाः सहजतायाश्च मार्गस्वरूपन्तु सारस्वतव्याकरणम्। सरलतायाः दृष्ट्या सारस्वतव्याकरणं संस्कृतव्याकरणशास्त्रपरम्परायाम् एका अनुपमकृति इति विद्वांसः आमनन्ति। यत्र व्याकरणस्य सिद्धयः प्रक्रियाश्च सरलतया बोधगम्यशैल्या च प्रतिपादिता, ग्रन्थस्यास्य मङ्गलाचरणं विषयेऽस्मिन् साक्षात्प्रमाणमावहति-

**प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।**

**सारस्वतीमृजुं कुर्व्वे प्रक्रियां नातिविस्तराम्[23]।।**

यद्यपि वर्तमानकाले सारस्वतव्याकरणस्य पठनं पाठनञ्च औपचारिकरूपेण न भवति, सर्वथैव व्याकरणस्यास्य अध्ययनस्य अध्यापनस्य धारा समाप्तप्रायास्ति। परन्तु संस्कृतभाषायाः रक्षणाय सम्वर्धनाय च सारस्वतव्याकरणस्य महती भूमिका विद्यते। अत एव प्रसिद्धेषु व्याकरणग्रन्थेषु सारस्वतव्याकरणस्य नाम ग्रहणः सम्मानेन सह भवति-

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्[24]।।**

**सन्दर्भग्रन्थसूची-**

*अष्टाध्यायी*, महर्षिपाणिनिः, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2014

*सारस्वतव्याकरणम्*, अनुभूतिस्वरूपाचार्यः, प्रकाशकः- पाण्डुरङ्गजावजी, निर्णयसागराख्यमुद्रणयन्त्रालयम्, मुम्बई, 1922

*सारस्वतव्याकरणम्*, अनुभूतिस्वरूपाचार्यः, सम्पादकः- श्रीजगदीशतर्कतीर्थः, संस्कृत-पुस्तक-भाण्डारः, कोलकाता, 1980

*ऋग्वेद-प्रातिशाख्यम्*, व्याख्याकारः- व्रजबिहारीचौबे, भारतीय-विद्या-प्रकाशनम्, वाराणसी, 1997

*महाभाष्य-पस्पशाह्निकम्*, महर्षिपतञ्जलिः, व्याख्या.- चारुदेवशास्त्री, श्रीमोतीलाल बनारसीदास, दिल्ली, 1971

*वैयाकरणसिद्धान्तकौमुदी*, भट्टोजिदीक्षितः, व्याख्या.- श्रीगोविन्दाचार्यः, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2018

*लघुसिद्धान्तकौमुदी*, वरदराजः, व्याख्या.- गोविन्दप्रसादशर्मा, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2019

*संस्कृत व्याकरण शास्त्र का इतिहास*, आचार्यः युधिष्ठिरमीमांसकः, चौखम्भा-पब्लिशर्स, वाराणसी, 2020

---

[1] महाभाष्य-पस्पशाह्निकम्, व्याख्याकारः- चारुदेवशास्त्री, श्रीमोतीलालबनारसीदासः प्राच्यपुस्तक-प्रकाशकः, दिल्ली, 1971, पृष्ठसङ्ख्या 4

[2] तत्रैव, पृ. 5-6

[3] गोपथब्राह्मणम् 1.24

[4] ऋक्तन्त्रम् 1.4

[5] कविकल्पद्रुमः, कलकाता-प्रकाशनम्, 1872, पृ. 2

[6] संस्कृत व्याकरण शास्त्र का इतिहास, आचार्यः युधिष्ठिरमीमांसकः, चौखम्भा-पब्लिशर्स, वाराणसी, 2020, पृ. 206

[7] इति श्रीनरेन्द्राचार्यकृते सारस्वते क्षेमैन्द्रटिप्पनं समाप्तम्।- संस्कृत व्याकरण शास्त्र का इतिहास, पृ. 267

[8] व्याकरणमहाभाष्यम्, द्वितीयं खण्डम्, व्याख्या- महामहोपाध्यायपण्डितशिवदत्तशर्मा, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, 1988, पृ. 22

[9] वैयाकरणसिद्धान्तकौमुदी, संज्ञाप्रकरणम्, व्याख्या- श्रीगोविन्दाचार्यः, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2018, पृ. 11

[10] नन्दिकेश्वर-काशिका 1, चौखम्बा-विद्याभवनम्, वाराणसी, 1999

[11] सारस्वतव्याकरणम्, चन्द्रकीर्तिटीका, प्रकाशकः- भार्गवपुस्तकालयः, काशी, पृ. 10

[12] अष्टौ समानाक्षराण्यादितः।- ऋक्-प्रातिशाख्यम् 1.1

[13] ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि।- तत्रैव 1.2

[14] तत्रैव 1.3

[15] षोडशादितः स्वराः।- तैत्तिरीयप्रातिशाख्यम् 1.1.5

[16] उदात्तादयः स्वराः।- याज्ञवल्क्यशिक्षा, स्वरप्रकरणम् 6

[17] ऋक्. प्रा. 1.65

[18] धातुसूत्रगणोणादि वाक्यलिङ्गानुशासनम्। आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः॥- रूपावतारः, प्रथमो भागः, सम्पादकः- म. रङ्गाचार्यः, जी ए नटेसन एण्ड को. मद्रास, 1927, पृ. 1

[19] लघुसिद्धान्तकौमुदी, संज्ञाप्रकरणम्, व्याख्या- गोविन्दप्रसादशर्मा, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2019, पृ. 5

[20] सारस्वतव्याकरणम्, चन्द्रकीर्तिटीका, पृ. 10

[21] ऋक्. प्रा. 1.8

[22] माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते।- महाभाष्यम्, तृतीयाह्निकम्, पृ. 130

[23] सारस्वतव्याकरणम्, मङ्गलाचरणम्, पृ. 1

[24] संस्कृत व्याकरण शास्त्र का इतिहास, पृ. 30